**Series : RKM/1**

**Code No.** **कोड नं.** **52/1**

Roll No.
रोल नं.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

- Please check that this question paper contains **15** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the serial number of the question before attempting it.**
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**

# COMMUNICATIVE SANSKRIT

# संस्कृतम् (सम्प्रेषणाधारितम्)

*अवधि : होरात्रयम्* — *पूर्णांक : 100*

*Time allowed : 3 hours* — *Maximum Marks : 100*

*निर्धारित समय : 3 घण्टे* — *अधिकतम अंकः : 100*

| | | |
|---|---|---|
| खण्डः क : अपठितांश-अवबोधनम् / अपठित-अवबोधन<br>Section A : Unseen Reading Comprehension | | **15 अंकः** |
| खण्डः ख : रचनात्मककार्यम् — रचनात्मक-कार्य<br>Section B : Writing Skills | | **20 अंकः** |
| खण्डः ग : अनुप्रयुक्तव्याकरणम् — अनुप्रयुक्त व्याकरण<br>Section C : Applied Grammar | | **30 अंकः** |
| खण्डः घ : पठित-अवबोधनम् / पठित-अवबोधन<br>Section D : Reading Comprehension | | **35 अंकः** |

**Instructions :**

**निर्देशः :**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
इस प्रश्न-पत्र में चार खण्ड हैं।
There are four sections in this questions paper.

(ii) प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
प्रत्येक खण्ड के उत्तर पृथक् दी गई उत्तर-पुस्तिका में ही लिखने हैं।
The answers have to be written in a separate answer-sheet.

(iii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम में लिखने होंगे।
The answers to each section must be written at one place.

(iv) प्रश्नपत्रे उत्तराणि न लेखनीयानि।
प्रश्न-पत्र पर उत्तर न लिखें।
Don't write answers in the question paper.

(v) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
प्रश्न-पत्र के अनुसार प्रश्न संख्या अवश्य ही लिखनी होगी।
Write the question number according tothe question paper.

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
सभी प्रश्नों के उत्तर संस्कृत में लिखिए।
Answer all the questions in Sanskrit.

## खण्डः क (Section A)
## अपठितांश-अवबोधनम् (अपठित-अवबोधन)
## Unseen Reading Comprehension

15 अंकः

**1.** अधोलिखित-अनुच्छेदद्वयं पठित्वा प्रदत्तप्रश्नान् पृथक प्रदत्तायाम् उत्तरपुस्तिकायाम् उत्तरत—
निम्नलिखित दोनों अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर पृथक् दी गई उत्तर-पुस्तिका में लिखिए —
Read the following two passages and answer the questions in the given answer-sheet :

**(क) प्रथमः अनुच्छेदः**

जीवने समाजसेवा अवश्यं करणीया। यदि वयं कस्मैचित् दीनाय धनं यच्छामः, निश्शुल्कं निरक्षरं पाठयामः, तस्य स्मरणेन अपि आनन्दः भवति। यदि वयम् अधिकम् आनन्दम् इच्छामः तर्हि अधिकाधिकानां जनानां सहायतां कुर्याम। विद्यां यच्छाम, धनं यच्छाम, स्नेहं यच्छाम, समयं यच्छाम। दुःखस्य मूलं स्वार्थः, सुखस्य मूलं त्यागः। इदम् एव सफलतायाः रहस्यम्।

**प्रश्नाः**

I. एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : **½×4=2**

(i) स्वार्थः कस्य मूलम् ?

(ii) त्यागः कस्य मूलम् ?

(iii) जीवने अवश्यं का करणीया ?

(iv) वयं निश्शुल्कं कं पाठयामः ?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : **1×1=1**

अधिकाधिकम् आनन्दं प्राप्तुं वयं किं किं कुर्याम ?

III. यथानिर्देशम् उत्तरत :

यथानिर्देश उत्तर दीजिए :

Answer as directed : **½×4=2**

(i) 'कस्मैचित्' इति विशेषणं कस्य पदस्य अस्ति?

(ii) 'यच्छामः' इति क्रियापदस्य कर्ता कः?

(iii) 'इदम् एव सफलतायाः रहस्यम्' इति वाक्ये किम् अव्ययपदम्?

(iv) 'शुल्कं विना' इति कस्य पदस्य अर्थः?

**(ख) द्वितीयः अनुच्छेदः**

कालिदासः मेघदूतं रचितवान्। मेघदूते मानसूनविज्ञानस्य अद्भुतं वर्णनम् अस्ति। मानसूनसमयः आषाढमासात् प्रारभते। श्याममेघान् दृष्ट्वा सर्वे जनाः प्रसन्नाः भवन्ति। मयूराः नृत्यन्ति। मानसूनमेघाः सर्वेषां जीवानां कष्टम् अपहरन्ति। मेघानां जलं वनस्पतिभ्यः, पशुपक्षिभ्यः, किं वा सर्वेभ्यः प्राणिभ्यः जीवनं प्रयच्छति। मेघजलैः भूमेः उर्वराशक्तिः वर्धते। क्षेत्राणां सिञ्चनं भवति। गगने यदा कदा इन्द्रधनुः अपि दृश्यते। वायुः शीतलः भवति। शुष्कभूमौ वर्षायाः बिन्दवः पतन्ति। भूमेः सुगन्धितं बाष्पं निर्गच्छति। कदम्बपुष्पाणि विकसन्ति। तेषु भ्रमराः गुञ्जन्ति। हरिणाः प्रसन्नाः भूत्वा इतस्ततः धावन्ति। चातकाः जलबिन्दून् पिबन्ति। बलाकाः पंक्तिं बध्द्वा आकाशे उड्डीयन्ते। मेघदूते मेघः यक्षस्य सन्देशं नयतु इति प्रार्थितः। अतः कालिदासः वायुमार्गस्य ज्ञानवर्धकं वर्णनं करोति।

**प्रश्नाः**

I. एकपदेन उत्तरत :

एक शब्द में उत्तर दीजिए :

Answer in one word : **1×2=2**

(i) मेघानां जलं प्राणिभ्यः किं प्रयच्छति?

(ii) भ्रमराः कुत्र गुञ्जन्ति?

II. पूर्णवाक्येन उत्तरत :

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence : **1×4=4**

(i) भूमेः किं निर्गच्छति ?

(ii) मेघदूतं कः रचितवान् ?

(iii) मानसूनमेघाः केषां कष्टम् अपहरन्ति ?

(iv) बलाकाः कथम् आकाशे उड्डीयन्ते ?

III. यथानिर्देशम् उत्तरत :

यथानिर्देश उत्तर दीजिए :

Do as directed : **½×4=2**

(i) अन्तिमपंक्तौ अव्ययपदं चित्वा लिखत।

(ii) ज्ञानवर्धकम् इति कस्य विशेषणम् ?

(iii) 'धावन्ति' इति क्रियापदस्य कर्ता कः ?

(iv) 'क्षीयते' क्रियापदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।

इस अनुच्छेद के लिए उपयुक्त शीर्षक लिखिए।

Write a suitable title for this paragraph. **2**

## खण्डः ख (Section B)
## रचनात्मककार्यम् (रचनात्मक-कार्य)
## Writing Skills

20 अंकः

**2. पत्रलेखनम् :** **½×10=5**

भवती सुनीता। भवती पुस्तकालयात् एकं पुस्तकं 'चटुकुल्याशतकम्' स्वीकृत्य पठितवती। तस्य पुस्तकस्य छायाप्रतिं स्वभगिन्याः सकाशं प्रेषयति। तदर्थं लिखितं पत्रं मञ्जूषादत्तपदैः पूरयित्वा पुनः लिखतु।

आप सुनीता हैं। आपने पुस्तकालय से एक पुस्तक 'चटुकुल्याशतकम्' लेकर पढ़ी है। उस पुस्तक की छायाप्रति आप अपनी बहिन स्मिता के पास भेज रही हैं। इस आशय से लिखे गये पत्र को मञ्जूषा में दिए गए पदों से भर कर पुनः लिखिए।

You are Sunita. You borrowed a book 'Chatukulya-Satakam' from the library. You are sending a photo-copy of the same to your sister Smita. Fill in the blanks in the following letter written to your sister Smita in that context with the help of words given in the box and rewrite the same.

ए. 10, विष्णुनगरम्

(i)__________

दिनाङ्कः__________

प्रिय (ii)__________

सस्नेहं नमः ।

अत्र सर्वगतं कुशलम् अस्ति। मन्ये भवती अपि (iii)__________। भवती लिखितवती यत् भवती संस्कृतभाषायां लिखितं सरलपुस्तकं पठितुम् इच्छति। मया पुस्तकालयात् 'चटुकुल्याशतकम्' (iv)__________ स्वीकृत्य पठितम्। हसित्वा (v)__________ मम उदरे तु पीडा जाता। तस्य पुस्तकस्य छायाप्रतिं कारयित्वा अहं (vi)__________ सकाशं प्रेषयामि। पठनपाठने भवत्याः रुचिः सर्वदा (vii)__________। पठतु तावत्। कथम् अस्ति इति (viii)__________।

स्वपितरौ (ix)__________ मम प्रणामाञ्जलिः निवेदनीया।

भवदीया स्नेहसिक्ता भगिनी,

(x) __________ ।

**मञ्जूषा**

| |
|---|
| वर्धताम्, प्रति, सुनीता, कुशलिनी, स्मिते, संस्कृतपुस्तकम्, भवत्याः, हसित्वा, लिखतु, कानपुरतः। |

**3. संवादलेखनम्** **1×5=5**

मञ्जूषाप्रदत्तपंक्तिसहायतया अधोलिखितं संवादं पूरयित्वा पुनः लिखत —

मञ्जूषा में दी गई पंक्तियों की सहायता से निम्नलिखित संवाद को भरकर पुनः लिखिए —

Complete the following dialogue with the help of the statements given in the box and re-write in your answer-sheet :

एकदा कोऽपि बाबू वेषधारी नागरिकः नौकया नदीपारं गच्छति स्म। सः आकाशं पश्यति, नाविकं च पृच्छति —

नागरिकः — भो नाविक! नक्षत्रविद्यां जानासि किम्?

नाविकः — (i) ____________________

नागरिकः — (हसन्) भो मूर्ख! तव जीवनस्य चतुर्थांशः नष्टः। गणितं पठितवान् किम्?

नाविकः — (ii) ____________________

नागरिकः — अरे ! तव जीवनस्य अर्धं व्यर्थं जातम्। (वृक्षपङ्क्तीः दृष्ट्वा) वृक्षविज्ञानं जानासि?

नाविकः — (iii) ____________________

नागरिकः — हा हन्त! तव जीवनस्य त्रिचतुर्थांशः व्यर्थः गतः।

नाविकः — (iv) ____________________

नागरिकः — भोः। एषा नौका तु दोलायते। जलमपि प्रविशति। किं करोमि। तरणं न जानामि।

नाविकः — (v) ____________________

**मञ्जूषा**

- गणनाम् एव जानामि, न तु गणितम्।
- भोः कथं वृक्षविज्ञानं जानामि। कथमपि नौकां चालयामि, उदरञ्च भरामि।
- नहि नहि, अहं तु प्रतिदिनं तारकाणि दृष्ट्वा नमामि।
- तरणं न जानासि किल? तर्हि नूनं तव सम्पूर्णमेव जीवनं नष्टम्।
- पश्यतु पश्यतु, प्रबलः वायुप्रकोपः उत्पन्नः। अहं तु कूर्दित्वा तरामि।

**4.** **चित्रवर्णनम् :** **2×5=10**

मञ्जूषापदसहायतया अधोलिखितं चित्रं **पञ्च** संस्कृतवाक्येषु वर्णयत —

मञ्जूषा के पदों की सहायता से अधोलिखित चित्र का वर्णन **पाँच** संस्कृत वाक्यों में कीजिए —

Describe the following picture in **five** Sanskrit sentences with the help of words given in the box :



**मञ्जूषा**

| |
|---|
| द्वौ बालश्रमिकौ, हस्ते, सूचिका, सूच्या, पुष्पाणि, शाटिकायाम्, कार्ये संलग्नौ, मस्तके श्रमबिन्दवः, वस्त्राणि, न, समुचितानि, कण्ठे कृष्णसूत्रमेव, बालकयोः उपरि अत्याचारः, बाल्यसुखात् वञ्चितौ। |

**अथवा (or)**

**केवलं प्रज्ञाचक्षुर्भ्यः**

**(केवल नेत्रहीनों के लिए)**

**For Blind Candidates only**

'बालश्रमः बालकेषु अत्याचारः' इति विषयम् अधिकृत्य संस्कृतेन **पञ्च** वाक्यानि लिखत। सहायतायै मञ्जूषा दत्ता।

'बालश्रमः बालकेषु अत्याचारः' इस विषय पर संस्कृत में **पाँच** वाक्य लिखिए। सहायता के लिए मञ्जूषा दी गई है।

Write **five** sentences in Sanskrit on 'बालश्रमः बालकेषु अत्याचारः' You can take help from the words given in the box.

**मञ्जूषा**

| |
|---|
| जलपानगृहेषु, भोजनालयेषु, उद्योगेषु, बालकाः, अल्पवेतनम्, सुविधानाम् अभावः, शिक्षातः वञ्चिताः, सूचीकार्यम्, क्रीडनात्, बाल्यसुखात् वञ्चिताः, विविधाः अत्याचाराः, जनाः, ग्रामेभ्यः आनयन्ति, क्रीत्वा अपि। |

**2×5=10**

## खण्डः ग (Section C)

## अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)

## Applied Grammar

30 अंकः

**5.** अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु सन्धिच्छेदं सन्धिं वा विधाय उत्तरपुस्तिकायां लिखत— **1×3=3**

निम्नलिखित वाक्यों में रेखाङ्कित पदों में सन्धिच्छेद/सन्धि करके उत्तरपुस्तिका में लिखिए—

Rewirte the underlined words of the following sentences in your answer-sheet after joining/disjoining sandhis :

(i) तत् + श्रुत्वा यूथपतिः सगद्गदम् उक्तवान्।

(ii) सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियात्।

(iii) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति!

**6.** रेखाङ्कितपदेषु समासं विग्रहं वा विधाय उत्तरपुस्तिकायां लिखत। **1×4=4**

रेखाङ्कित पदों में समास/विग्रह करके उत्तरपुस्तिका में लिखिए।

Join or disjoin the compounds in the underlined words and re-wirte them in the answer-sheet. :

(i) अहमेव शीतले जले 'स्थितप्रज्ञः' इव तिष्ठामि।

(ii) अहम् आम्रवृक्षे स्थित्वा पञ्चमस्वरेण गायामि।

(iii) को भेदः पिकः च काकः च तयोः ?

(iv) अहो! न ज्ञानं भवत्याः ?

**7.** कोष्ठके प्रदत्तान् प्रकृतिप्रत्ययान् योजयित्वा अनुच्छेदं पुनः लिखत। **1×5=5**

कोष्ठक में दिए गए प्रकृति-प्रत्ययों को जोड़कर अनुच्छेद को पुनः लिखें।

Rewrite the passage after joining suffixes to the roots or words given in brackets.

प्रातःकाले उद्यानस्य शोभा खलु (i) __________ (दृश्. अनीयर्)। शीघ्रं शीघ्रं (ii) ___________ (चल् + शतृ) जनाः प्रसन्ना भवन्ति। ते वायोः (iii) __________ (शीतल. तल्) अनुभवन्ति (iv) __________ (पक्ष + इन्) मधुरस्वरेण गायन्ति। बालकाः (v) __________ (बालक + टाप्) च कन्दुकेन क्रीडन्ति।

**8.** प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत। **1×5=5**

दिए गए अव्यय पदों से रिक्त स्थानों को भरकर वाक्यों को पुनः लिखिए।

Rewrite the following sentences after filling in the blanks with suitable indeclinables.

(i) विद्यालये __________ वार्षिकोत्सवः अस्ति।

(ii) छात्राः विद्यालयात् __________ प्रवेशद्वारे अतिथीनां स्वागतं करिष्यन्ति।

(iii) केचन __________ जयघोषं करिष्यन्ति।

(iv) छात्राः __________ एव विद्यालयम् अलङ्कृतवन्तः।

(v) पश्यत, __________ मुख्यातिथिः आगच्छति।

(उच्चैः, अधुना, अद्य, ह्यः, बहिः)

**9.** अधोलिखितवार्तालापे रिक्तस्थानानि पूरयित्वा उत्तराणि एव उत्तरपुस्तिकायां लिखत — **1×3=3**

निम्नलिखित वार्तालाप में रिक्त स्थान भरकर उत्तर, उत्तरपुस्तिका में ही लिखिए —

Fill in the blanks in the following dialogue and write the answers in the answer-sheet only:

सुरेशः — मालति! किम् अतिथयः भोजनं कुर्वन्ति?

मालती — आम् भ्रातः। अतिथिभिः भोजनं (i) __________ ।

सुरेशः — मालति! किं जनकः अपि तत्र उपविशति ?

मालती — भ्रातः! (ii) __________ तत्र न उपविश्यते।

सुरेशः — मालति! किं माता फलानि आनयति?

मालती — आम्! मात्रा (iii) __________ आनीयन्ते।

**10.** अधोलिखितकार्यक्रमे अङ्कानां स्थाने संस्कृतपदेषु समयम् उत्तरपुस्तिकायां लिखत — **1×4=4**

निम्नलिखित कार्यक्रम में अङ्कों के स्थान पर संस्कृत शब्दों में समय उत्तरपुस्तिका में लिखिए —

Indicate the time as shown in the following schedule in Sanskrit words in the answer-sheet :

(i) 6.15 सायम् अतिथीनाम् आगमनम्, जलपानम्।

(ii) 7.30 सायम् काव्यगोष्ठी।

(iii) 8.15 सायम् भक्तिसङ्गीतम्।

(iv) 10.00 सायम् समापनम्।

**11.** अधोदत्तेषु वाक्येषु अंकानां स्थाने संस्कृतसंख्यावाचकविशेषणानि पूरयत — **½×4=2**

निम्नलिखित वाक्यों में अंकों के स्थान पर संस्कृत के संख्यावाचक विशेषण लिखिए —

Write numerical Sanskrit adjectives in place of figures in the following sentences.

(i) वेदाः ____4____ सन्ति।

(ii) ____3____ महिलाः प्रतिदिनं पूजां कुर्वन्ति।

(iii) ____2____ भगिन्यौ सस्वरं गीतां पठतः।

(iv) गीता ____1____ महान् ग्रन्थः अस्ति।

**12.** अधोलिखितवाक्यानां संशोधनं कृत्वा वाक्यानि पुनः लिखत — **1×4=4**

अधोलिखित वाक्यों का संशोधन करके वाक्यों को पुनः लिखिए —

Correct the following senctences and re-write them in the answer-sheet :

वयं नित्यम् अग्रजानां चरणौ <u>स्पृशन्ति</u>, तेषाम् <u>आशीर्वादाः</u> अस्मान् रक्षति, ये <u>शिष्यौ</u> गुरुजनानां चरणौ स्पृशन्ति, तेषाम् आयुः <u>वर्धन्ते</u>।

## खण्डः ख (Section D)
## पठित-अवबोधनम् (पठित-अवबोधन)
## Reading Comprehension

35 अंकः

**13.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत —
निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर उत्तर-पुस्तिका में लिखिए—
Read the following prose, poetry and drama passages and answer the given questions in the answer-sheet :

**(क) गद्यांशः**

अत्र अनेके प्रमुखोत्सवाः। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु फरवरी मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं, सेतुनिर्माणम् च सामाजिकं कार्यं क्रियते। 'मोपीन' इत्यपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली' सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रेल' इति मासे मान्यते।

**प्रश्नाः**

I. एकपदेन उत्तरत : **½×4=2**

एक शब्द में उत्तर दीजिए :

Answer in one word :

(i) देवानां देवः कः कथ्यते ?

(ii) 'ओरिया पर्व' कस्मिन् मासे मान्यते ?

(iii) 'मोपीन' इति पर्व केन सदृशम् ?

(iv) जनाः परस्परं मुखे कपोले च किं लिम्पन्ति ?

II. पूर्णवाक्येन उत्तरत : **1×1=1**

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence :

'ओरिया' पर्वणि किं किं कार्यं क्रियते ?

III. यथानिर्देशम् उत्तरत : **½×4=2**

यथानिर्देश उत्तर दें :

Do as directed :

(i) प्रमुखम् इति कस्य पदस्य विशेषणम् ?

(ii) ''इदम्' अप्रेलमासे मान्यते' इत्यत्र इदं सर्वनामपदं कस्मै प्रयुक्तम् ?

(iii) 'लिम्पन्ति' इति क्रियापदस्य किं कर्तृपदम् ?

(iv) 'अत्र अनेके प्रमुखोत्सवाः' इति वाक्ये किम् अव्ययपदम् ?

**(ख) पद्यांशः**

आचारः प्रथमो धर्मः, इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं, प्राणेभ्योऽपि विशेषतः।।

**प्रश्नाः**

I. एकपदेन उत्तरत : **1×2=2**

एक शब्द में उत्तर दीजिए :

Answer in one word :

(i) 'प्रथमः धर्मः आचारः' इति केषां वचः ?

(ii) तस्मात् कं रक्षेत् ?

II. पूर्णवाक्येन उत्तरत : **1×1=1**

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence :

सदाचारस्य रक्षा केभ्यः अपि करणीया ?

III. यथानिर्देशम् उत्तरत : **½×4=2**

यथानिर्देश उत्तर दीजिए :

Do as directed :

(i) 'प्रथमः' इति कस्य पदस्य विशेषणम् ?

(ii) 'विशेषरूपेण' इति स्थाने किं पदमत्र प्रयुक्तम् ?

(iii) 'वचनम्' इति स्थाने किं पदमत्र प्रयुक्तम् ?

(iv) प्रथमपंक्तौ किम् अव्ययपदम् प्रयुक्तम् ?

**(ग) नाट्यांशः**

युधिष्ठिरः — सम्प्रति आश्वस्तः अस्मि। मन्ये स ब्रह्मास्त्रप्रयोगं न करिष्यति।

श्रीकृष्णः — तर्हि न जानासि तस्य मनोवृत्तिम्। पितुः उपदेशेन असन्तुष्टः स एकदा द्वारकापुरीम् आगच्छत्। ब्रह्मास्त्रं दत्त्वा सः सुदर्शनचक्रम् अवाञ्छत्।

युधिष्ठिरः — (साश्चर्यम्) कथं चक्रम् इति।

श्रीकृष्णः — आम्! मया कथितम् नाहं त्वत्तः ब्रह्मास्त्रम् इच्छामि। यदि त्वं मम गदां, शक्तिं, धनुः, चक्रं वा इच्छसि, तुभ्यं ददामि।

युधिष्ठिरः — ततस्ततः।

श्रीकृष्णः — स तु चक्रमेव अयाचत। गृहाण चक्रम् इति उक्तः स सव्येन पाणिना चक्रं गृहीतवान् किन्तु सः तत् चक्रं स्वस्थानात् संचालयितुम् अपि समर्थः नाभवत्।

**प्रश्नाः**

I. एकपदेन उत्तरत : **½×4=2**

एक शब्द में उत्तर दीजिए :

Answer in one word :

(i) अश्वत्थामा श्रीकृष्णं किम् अयाचत ?

(ii) अश्वत्थामा केन पाणिना चक्रं गृहीतवान् ?

(iii) अश्वत्थामा कस्य उपदेशेन असन्तुष्टः आसीत् ?

(iv) अश्वत्थामा किं दत्त्वा चक्रम् अवाञ्छत् ?

II. पूर्णवाक्येन उत्तरत : **1×1=1**

पूर्ण वाक्य में उत्तर दीजिए :

Answer in a complete sentence :

श्रीकृष्णः द्रोणपुत्राय किं किं दातुं तत्परः अभवत् ?

III. यथानिर्देशम् उत्तरत : **½×4=2**

यथानिर्देश उत्तर दें :

Answer as directed :

(i) 'कथं चक्रम्' इति कः कथयति ?

(ii) 'अगच्छत्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iii) 'इच्छसि' क्रियापदस्य कर्तृपदं किम् ?

(iv) 'हस्तेन' इति स्थाने किं पदमत्र प्रयुक्तम् ?

**14.** अधोलिखितपद्यद्वयस्य भावार्थम् उपयुक्तपदैः पूरयित्वा पुनः लिखत — **3+3=6**

निम्नलिखित दो पद्यों के भावार्थों को उपयुक्त शब्दों से भरकर पुनः लिखिए —

Rewrite the explanations of the following two stanzas and re-write them in the answer-sheet :

I. असंशयं महाबाहो! मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते।।

**भावार्थः**

(i) हे ________ ! अत्र संशयः नास्ति यत् एतत् (ii) ________ अतीव चञ्चलम् अस्ति। कष्टेन एव वशे भवति परन्तु यदि वयं पुनः पुनः (iii) ________ कुर्मः, विरक्ताः च भवामः, तदा नूनम् एतत् वशे कर्तुं शक्यते।

II. नलिनीदलगतजलवत्तरलं किम्? यौवनं, धनं चायुः।
कथय पुनः के शशिनः किरणसमाः? सज्जना एव।।

**भावार्थः**

कमलस्य पत्रस्य उपरि स्थितं जलबिन्दुवत् चञ्चलं किम्? (i) ________, धनम् (ii) ________ च। के जनाः चन्द्रस्य किरणाः इव शीतलाः इति वद। ते तु, (iii) __________ एव।

**15.** अधोलिखितपद्यद्वयस्य अन्वयौ पूरयित्वा पुनः लिखत — **1½+1½=3**

निम्नलिखित दो पद्यों के अन्वयों को पूरा करके पुनः लिखिए —

Complete and re-write the prose order renderings of the following two stanzas :

I. मित्ररूपाः हि रिपवः सम्भाष्यन्ते विचक्षणैः।
ये हितं वाक्यमुत्सृज्य विपरीतोपसेविनः।।

**अन्वयः**

ये हितम् वाक्यम् (i) __________ विपरीत-उपसेविनः (भवन्ति), (ते) (ii) __________मित्ररूपाः हि (iii) __________ सम्भाष्यन्ते।

II. आचार्यात्पादमादत्ते, पादं शिष्यः स्वमेधया।
कालेन पादमादत्ते, पादं सब्रह्मचारिभिः।।

**अन्वयः**

शिष्यः आचार्यात् पादम् (i) __________ स्वमेधया (ii) _________ (आदत्ते), कालेन पादम् आदत्ते, (शिष्यः) (iii) __________ पादम् (आदत्ते)।

**16.** रेखाङ्कितपदानि आश्रित्य प्रश्ननिर्माणं कुरुत। **1×4=4**

रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए :

Frame questions on the basis of the underlined words :

(i) <u>सर्वैः</u> एव मे शोभा।

(ii) आपत्काले <u>सरांसि</u> त्यक्त्वा दूरं व्रजसि।

(iii) सर्वः <u>दुर्गाणि</u> तरतु।

(iv) <u>विश्वस्य</u> आत्मा अहम्।

**17.** घटनाक्रमानुसारम् अधोलिखितवाक्यानि पुनः क्रमेण लिखत — **½×8=4**

घटनाक्रम के अनुसार निम्नलिखित वाक्यों को पुनः क्रम से लिखिए —

Re-write the following sentences in the sequential order :

(i) दुष्टबुद्धिः तु तस्य वचनानि तिरस्कृतवान्।

(ii) प्रच्छन्नभाग्यः कृषकस्य क्षेत्रे कार्यं कृत्वा धनी जातः।

(iii) मार्गे क्रीडत्सु बालकेषु एकः वदति-भोः! युवाम् किमर्थं कुपथे प्रवृत्तौ ?

(iv) सः अचिन्तयत् - नूनम् अहं चौर्यकार्यं त्यक्त्वा गृहं गच्छामि।

(v) एतच्छ्रुत्वा प्रच्छन्नभाग्यस्य नेत्रे समुन्मीलिते जाते।

(vi) प्रच्छन्नभाग्यः गृहम् आगत्य उच्चैः रोदितुम् आरभत।

(vii) सः ग्रामे ग्रामे चौर्यकार्यं कृतवान्।

(viii) तस्य बुद्धिमती भार्या अवदत् - धैर्यं धारय, उद्यमं कुरु।

**18.** प्रसङ्गानुसारं रेखाङ्कितपदानां शुद्धम् अर्थं चित्वा लिखत। **1×3=3**

प्रसंग के अनुसार रेखांकित पदों के शुद्ध अर्थ चुनकर लिखिए।

Write the meaning of the underlined words suitable to the context.

I. अस्य <u>याच्ञा</u> वृथा मा अस्तु।

(i) पाचना (ii) भिक्षा (iii) यातना।

II. तस्य प्रथमम् एकं चक्षुः <u>प्रतिष्ठितम्</u> अभवत्।

(i) आदरयोग्यम् (ii) प्रस्थानयोग्यम् (iii) स्थापितम्।

III. शक्रः तत्रैव <u>अन्तर्हितः</u> अभवत्।

(i) अग्रे स्थितः (ii) विलुप्तः (iii) मध्ये स्थितः।